श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# श्रीमद्भागवत रसिक कुटुंब

## उद्धव गीता 11.7 प्रथम सोपान



स्वधाम प्रस्थान को देखो हो रहे श्रीकृष्ण तैयार
उद्धृत किये उद्धव समक्ष अद्भुत अनमोल उद्गार

**नारायणं(न्) नमस्कृत्य, नरं(ञ्) चैव नरोत्तमम्।**
**देवीं(म्) सरस्वतीं(वँ) व्यासं(न्), ततो जयमुदीरयेत्**

**नामसङ्कीर्तनं(यँ) यस्य, सर्वपापप्रणाशनम्।**
**प्रणामो दुःखशमनस्, तं(न्) नमामि हरिं(म्) परम्**

**श्रीमद्भागवतमहापुराणम्**

**एकादशः स्कंधः**

**॥ अथ सप्तमोऽध्यायः॥**

**श्रीभगवानुवाच**

**यदात्थ मां(म्) महाभाग, तच्चिकीर्षितमेव मे ।**
**ब्रह्मा भवो लोकपालाः(स्), स्वर्वासं(म्) मेऽभिकाङ्क्षिणः ॥ 1॥**

तच्चि+ कीर्षित+ मेव, मेऽभि+ काङ्क्षिणः

**मया निष्पादितं(म्) ह्यत्र, देवकार्यमशेषतः ।**
**यदर्थमवतीर्णोऽह- मं(म्)शेन ब्रह्मणार्थितः ॥ 2॥**

देव+ कार्य+ मशेषतः,यदर्थ+ मव+ तीर्णोऽह, ब्रह्म+ णार्थितः

**कुलं(वँ) वै शापनिर्दग्धं(न्), नं(ङ्)क्ष्यत्यन्योन्यविग्रहात् ।**
**समुद्रः(स्) सप्तमेऽह्न्येतां(म्), पुरीं(ञ्) च प्लावयिष्यति ॥ 3॥**

नङ्क्ष्यत्+ यन् + योन्य+ विग्रहात्, सप्त+ मेऽह्+ न्येतां(म्), प्लाव+ यिष्यति

यर्ह्येवायं(म्) मया त्*यक्तो, लोकोऽयं(न्) न*ष्टम*ङ्गलः ।

भवि*ष्य*त्यचिरात् साधो, कलिनापि निराकृतः ॥ 4॥

यर्+ ह्ये+ वायं(म्), भविष्यत् + यचिरात्

न व*स्त*व्यं(न्) त्वयैवेह, मया त्*यक्ते महीतले ।

जनोऽधर्मरुचिर्*भद्र, भवि*ष्यति कलौ युगे ॥ 5॥

जनोऽ+ धर्म+ रुचिर्+ भद्र

त्वं(न्) तु सर्वं(म्) परि*त्*यज्*य, स्नेहं(म्) स्वजनब*न्धुषु ।

मय्यावेश्य मनः(स्) स*म्यक्, समदृग् विचर*स्व गाम् ॥ 6॥

यदिदं(म्) मनसा वाचा , च*क्षुर्भ्यां(म्) श्रवणादिभिः ।

न*श्वरं(ङ्) गृह्यमाणं(ञ्) च, वि*द्धि मायामनोमयम् ॥ 7॥

श्रवणा+ दिभिः, माया+ मनो+ मयम्

पुं(म्)सोऽयु*क्त*स्य नानार्थो , भ्रमः(स्) स गुणदोषभाक् ।

कर्माकर्मविकर्मेति, गुणदोषधियो भिदा ॥ 8॥

पुं(म्)सोऽ+ युक्तस्य, कर्मा+ कर्म+ विकर्मेति

त*स्माद् यु*क्तेन्द्रि*यग्रामो, यु*क्तचित्त इदं(ञ्) जगत् ।

आत्मनीक्ष*स्व वितत- मात्मानं(म्) मय्यधीश्वरे ॥ 9॥

युक्तेन्द्रि+ यग्रामो, आत् + मनी+ क्षस्व, मय्य+ धीश्वरे

ज्ञानवि*ज्ञानसं(यँ)यु*क्त, आत्मभूतः(श्) शरीरिणाम् ।

आत्मानुभवतु*ष्टात्मा, नान्तरायैर्विह*न्यसे ॥ 10॥

ज्ञान+ विज्ञान+ सं(यँ)युक्त, आत्मा+ नुभव+ तुष्टात्मा, नान् + तरायैर् + विहन्यसे

दोषबुद्ध्योभयातीतो, निषेधान्न निवर्तते ।

गुणबुद्ध्या च विहितं(न्), न करोति यथार्भकः ॥ 11॥

दोष + बुद्ध्यो+ भयातीतो, निषेधान्+ न

सर्वभूतसुहृ*च्छान्तो, ज्ञानवि*ज्ञाननि*श्चयः ।

पश्यन् मदात्मकं(वँ) विश्वं(न्),  न विपद्येत वै पुनः ॥ 12॥

सर्वभूत+ सुहृच् + छान्तो, ज्ञान+ विज्ञान+ निश्चयः

श्रीशुक उवाच

इत्यादिष्टो भगवता ,महाभागवतो नृप ।

उद्धवः(फ्) प्रणिपत्याह, तत्त्वजिज्ञासुरच्युतम् ॥ 13॥

प्रणि+ पत्याह, तत्त्व+ जिज्ञासु+ रच्युतम्

उद्धव उवाच

योगेश योगविन्यास ,योगात्मन् योगसम्भव ।

निः(श्)श्रेयसाय मे प्रोक्तस्- त्यागः(स्) सं(न्)न्यासलक्षणः ॥ 14॥

संन्यास+ लक्षणः

त्यागोऽयं(न्) दुष्करो भूमन्, कामानां(म्) विषयात्मभिः ।

सुतरां(न्) त्वयि सर्वात्मन्- नभक्तैरिति मे मतिः ॥ 15॥

नभक्तै+ रिति

सोऽहं(म्) ममाहमिति मूढमतिर्विगाढस्,

त्वन्मायया विरचितात्मनि सानुबन्धे ।

तत्त्वञ्जसा निगदितं(म्) भवता यथाहं(म्),

सं(म्)साधयामि भगवन्ननुशाधि भृत्यम् ॥ 16॥

मूढ+ मतिर् + विगाढस् ,त्वन् + मायया, भगवन्+ ननुशाधि

सत्यस्य ते स्वदृश आत्मन आत्मनोऽन्यं(वँ),

वक्तारमीश विबुधेष्वपि नानुचक्षे ।

सर्वे विमोहितधियस्तव माययेमे,

ब्रह्मादयस्तनुभृतो बहिरर्थभावाः ॥ 17॥

वक्ता+ रमीश, विमो+ हित+ धियस्+ तव,ब्रह्मा+ दयस् + तनुभृतो

तस्माद् भवन्तमनवद्यमनन्तपारं(म्),

सर्वज्ञमीश्वरमकुण्ठविकुण्ठधिष्ण्यम् ।

निर्विण्णधीरहमु ह वृजिनाभितप्तो,

नारायणं(न्) नरसखं(म्) शरणं(म्) प्रपद्ये ॥ 18॥

भवन् + तमनवद्य+ मनन्त+ पारं, सर्वज्ञमीश्वर+ मकुण्ठ+ विकुण्ठ+ धिष्ण्यम्

निर्विण्ण+ धीर + हमु, वृजिना+ भितप्तो

श्रीभगवानुवाच

प्रायेण मनुजा लोके, लोकतत्त्वविचक्षणाः ।

समुद्धरन्ति ह्यात्मान- मात्मनैवाशुभाशयात् ॥ 19॥

लोक+ तत्त्व+ विचक्षणाः,समुद्+ धरन्ति, मात्म+ नैवा+ शुभा+ शयात्

आत्मनो गुरुरात्मैव, पुरुषस्य विशेषतः ।

यत् प्रत्यक्षानुमानाभ्यां(म्), श्रेयोऽसावनुविन्दते ॥ 20॥

गुरु+ रात्मैव, प्रत्यक्षा+ नुमानाभ्यां, श्रेयोऽ+ साव+ नुविन्दते

पुरुषत्वे च मां(न्) धीराः(स्), सां(ङ्)ख्ययोगविशारदाः ।

आविस्तरां(म्) प्रपश्यन्ति, सर्वशक्त्युपबृं(म्)हितम् ॥ 21॥

साङ्ख्य+ योग+ विशारदाः, सर्व+ शक्त्युप+ बृं(म्)हितम्

एकद्वित्रिचतुष्पादो, बहुपादस्तथापदः ।

बह्व्यः(स्) सन्ति पुरः(स्) सृष्टास्- तासां(म्) मे पौरुषी प्रिया ॥ 22॥

एकद् + वित्रि+ चतुष्+ पादो, बहुपादस्+ तथा+ पदः

अत्र मां(म्) मार्गयन्त्यद्धा, युक्ता हेतुभिरीश्वरम् ।

गृह्यमाणैर्गुणैर्लिङ्गै- रग्राह्यमनुमानतः ॥ 23॥

मार्गयन् + त्यद्धा, हेतुभि+ रीश्वरम्, गृह्य+ माणैर् + गुणैर् + लिङ्गै

अत्राप्युदाहरन्तीम- मितिहासं(म्) पुरातनम् ।

अवधूतस्य सं(वँ)वादं(यँ), यदोरमिततेजसः ॥ 24॥

अत्राप् + युदा+ हरन्तीम, यदो+ रमित+ तेजसः

अवधूतं(न्) द्विजं(ङ्) कं(ञ्)चिच्- चरन्तमकुतोभयम् ।

कविं(न्) निरीक्ष्य तरुणं(यँ), यदुः(फ्) पप्रच्छ धर्मवित् ॥ 25॥

चरन् + तम+ कुतोभयम्

यदुरुवाच

कुतो बुद्धिरियं(म्) ब्रह्मन् - नकर्तुः(स्) सुविशारदा ।

यामासाद्य भवाँल्लोकं(वँ), विद्वां(म्)श्चरति बालवत् ॥ 26॥

विद्+ वां(म्)श्+ चरति

प्रायो धर्मार्थकामेषु, विवित्सायां(ञ्) च मानवाः ।

हेतुनैव समीहन्ते, आयुषो यशसः(श्) श्रियः ॥ 27॥

धर्मार्थ+ कामेषु

त्वं(न्) तु कल्पः(ख्) कविर्दक्षः(स्) ,सुभगोऽमृतभाषणः ।

न कर्ता नेहसे किं(ञ्)चिज्- जडोन्मत्तपिशाचवत् ॥ 28॥

सुभगोऽ+ मृत+ भाषणः, जडोन् + मत्त+ पिशाचवत्

जनेषु दह्यमानेषु, कामलोभदवाग्निना ।

न तप्यसेऽग्निना मुक्तो, गं(ङ्)गाम्भः(स्)स्थ इव द्विपः ॥ 29॥

कामलो+ भद+ वाग्निना, गं(ङ्)गाम् + भः(स्)स्थ

त्वं(म्) हि नः(फ्) पृच्छतां(म्) ब्रह्मन्- नात्मन्यानन्दकारणम् ।

ब्रूहि स्पर्शविहीनस्य, भवतः(ख्) केवलात्मनः ॥ 30॥

नात्मन्या+ नन्दकारणम् ,स्पर्श+ विहीनस्य

श्रीभगवानुवाच

यदुनैवं(म्) महाभागो, ब्रह्मण्येन सुमेधसा ।

पृष्टः(स्) सभाजितः(फ्) प्राह, प्रश्रयावनतं(न्) द्विजः ॥ 31॥

प्रश्रया+ वनतं(न्)

ब्राह्मण उवाच

सन्ति मे गुरवो राजन्, बहवो बुद्ध्युपाश्रिताः ।

यतो बुद्धिमुपादाय, मुक्तोऽटामीह ताञ्छृणु ॥ 32॥

बुद्ध्यु+ पाश्रिताः,बुद्धि+ मुपादाय, मुक्तोऽ + टामीह

पृथिवी वायुराकाश- मापोऽग्निश्चन्द्रमा रविः ।

कपोतोऽजगरः(स्) सिन्धुः(फ्), पतं(ङ्)गो मधुकृद् गजः ॥ 33॥

मापोऽग्निश् + चन्द्रमा

मधुहा हरिणो मीनः(फ्), पिं(ङ्)गला कुररोऽर्भकः ।
कुमारी शरकृत् सर्प , ऊर्णनाभिः(स्) सुपेशकृत् ॥ 34॥

कुररोऽर् + भकः

एते मे गुरवो राजं(म्)श्- चतुर्विं(न्)शतिराश्रिताः ।
शिक्षा वृत्तिभिरेतेषा- मन्वशिक्षमिहात्मनः ॥ 35॥

चतुर् + विं(म्)शति+ राश्रिताः,वृत्ति+ भिरे+ तेषा, मन्व+ शिक्ष+ मिहात्मनः

यतो यदनुशिक्षामि, यथा वा नाहुषात्मज ।
तत्तथा पुरुषव्याघ्र, निबोध कथयामि ते ॥ 36॥

यदनु+ शिक्षामि

भूतैराक्रम्यमाणोऽपि , धीरो दैववशानुगैः ।
तद् विद्वान्न चलेन्मार्गा- दन्वशिक्षं(ङ्) क्षितेर्व्रतम् ॥ 37॥

भूतै+ राक्रम्य+ माणोऽपि, दै+ ववशा+ नुगैः

शश्वत्परार्थसर्वेहः(फ्) परार्थैकान्तसम्भवः ।
साधुः(श्) शिक्षेत भूभृत्तो, नगशिष्यः(फ्) परात्मताम् ॥ 38॥

शश्वत् + परार्थ+ सर्वेहः(फ्), परार् + थैकान्त+ सम्भवः

प्राणवृत्त्यैव सन्तुष्येन् - मुनिर्नैवेन्द्रियप्रियैः ।
ज्ञानं(यँ) यथा न नश्येत , नावकीर्येत वाङ्मनः ॥ 39॥

प्राण+ वृत् + त्यैव, मुनिर् + नैवेन्द्रि+ यप्रियैः, नाव+ कीर् + येत

विषयेष्वाविशन् योगी, नानाधर्मेषु सर्वतः ।
गुणदोषव्यपेतात्मा , न विषज्जेत वायुवत् ॥ 40॥

विषयेष्+ वाविशन् , गुणदोष+ व्यपे+ तात्मा

पार्थिवेष्विह देहेषु, प्रविष्टस्तद्गुणाश्रयः ।
गुणैर्न युज्यते योगी, गन्धैर्वायुरिवात्मदृक् ॥ 41॥

पार्थि+ वेष्विह, प्रविष्टस्+ तद् + गुणाश्रयः ,गन्धैर् + वायु+ रिवात्म+ दृक्

अन्तर्हितश्च स्थिरजं(ङ्)गमेषु,
ब्रह्मात्मभावेन समन्वयेन ।

व्याप्त्याव्यवच्छेदमसं(ङ्)गमात्मनो,

मुनिर्नभस्त्वं(वँ) विततस्य भावयेत् ॥ 42॥

स्थिर+ जं(ङ्)ग+ मेषु, ब्रह्मात्म+ भावेन

व्याप्त्या+ व्यवच्छे+ दमसं(ङ्)ग+ मात्मनो, मुनिर्+ नभस् + त्वं(म्)

तेजोऽबन्नमयैर्भावैर् - मेघाद्यैर्वायुनेरितैः ।

न स्पृश्यते नभस्तद्वत्, कालसृष्टैर्गुणैः(फ्) पुमान् ॥ 43॥

तेजोऽ+ बन्न+ मयैर् + भावैर् ,मेघा+ द्यैर्+ वायु+ नेरितैः

नभस् + तद् + वत् ,काल+ सृष्टैर् + गुणैः(फ्)

स्वच्छः(फ्) प्रकृतितः(स्) स्निग्धो, माधुर्यस्तीर्थभूर्नृणाम् ।

मुनिः(फ्) पुनात्यपां(म्) मित्र- मीक्षोपस्पर्शकीर्तनैः ॥ 44॥

माधुर्यस् + तीर्थ+ भूर् + नृणाम् ,मीक्षो+ पस्पर्श+ कीर्तनैः

तेजस्वी तपसा दीप्तो, दुर्धर्षोदरभाजनः ।

सर्वभक्षोऽपि युक्तात्मा , नादत्ते मलमग्निवत् ॥ 45॥

दुर् + धर् + षोदर+ भाजनः, मल+ मग्नि+ वत्

क्वचिच्छन्नः(ख्) क्वचित् स्पष्ट, उपास्यः(श्) श्रेय इच्छताम् ।

भुङ्क्ते सर्वत्र दातृणां(न्), दहन् प्रागुत्तराशुभम् ॥ 46॥

क्वचिच् + छन्नः(ख्), प्रागुत् + तरा + शुभम्

स्वमायया सृष्टमिदं(म्), सदसल्लक्षणं(म्) विभुः ।

प्रविष्ट ईयते तत्तत्- स्वरूपोऽग्निरिवैधसि ॥ 47॥

सदसल् + लक्षणं(म्),तत्+ तत् ,स्वरूपोऽग् + निरि+ वैधसि

विसर्गाद्याः(श्) श्मशानान्ता, भावा देहस्य नात्मनः ।

कलानामिव चन्द्रस्य, कालेनाव्यक्तवर्त्मना ॥ 48॥

श्मशा+ नान्ता, कालेना+ व्यक्त+ वर्त्मना

कालेन ह्योघवेगेन , भूतानां(म्) प्रभवाप्ययौ ।

नित्यावपि न दृश्येते, आत्मनोऽग्नेर्यथार्चिषाम् ॥ 49॥

ह्योघ+ वेगेन, आत्मनोऽग् + नेर् + यथार् + चिषाम्

गुणैर्गुणानुपादत्ते , यथाकालं(वँ) विमुञ्चति ।
न तेषु युज्यते योगी , गोभिर्गा इव गोपतिः ॥ 50॥

गुणैर् + गुणा+ नुपा+ दत्ते

बुध्यते स्वे न भेदेन, व्यक्तिस्थ इव तद्गतः ।
लक्ष्यते स्थूलमतिभि- रात्मा चावस्थितोऽर्कवत् ॥ 51॥

तद्+ गतः, चाव+ स्थितोऽर्+ कवत्

नातिस्नेहः(फ्) प्रसङ्गो वा, कर्तव्यः(ख्) क्वापि केनचित् ।
कुर्वन् विन्देत सन्तापं(ङ्), कपोत इव दीनधीः ॥ 52॥

कपोतः(ख्) कश्चनारण्ये, कृतनीडो वनस्पतौ ।
कपोत्या भार्यया सार्ध-मुवास कतिचित् समाः ॥ 53 ॥

कश्+ चना+ रण्ये

कपोतौ स्नेहगुणित-हृदयौ गृहधर्मिणौ ।
दृष्टिं(न्) दृष्ट्यां(ङ्)गमं(ङ्)गेन, बुद्धिं(म्) बुद्ध्या बबन्धतुः ॥ 54 ॥

दृष्ट्यां(ङ्)+ गमं(ङ्)+ गेन

शय्यासनाटनस्थान-वार्ताक्रीडाशनादिकम् ।
मिथुनीभूय विस्रब्धौ, चेरतुर्वनराजिषु ॥ 55 ॥

शय्या+ सना+ टनस्थान ,वार्ता+ क्रीडा+ शनादिकम्, चे + रतुर् + वनराजिषु

यं(यँ) यं(वँ) वाञ्छति सा राजं(म्)स्-तर्पयन्त्यनुकम्पिता ।
तं(न्) तं(म्) समनयत् कामं(ङ्), कृच्छ्रेणाप्यजितेन्द्रियः ॥ 56॥

तर्पयन् + त्यनु+ कम्पिता, कृच्छ्रे+ णाप्य+ जितेन्द्रियः

कपोती प्रथमं(ङ्) गर्भं(ङ्), गृह्णती काल आगते ।
अण्डानि सुषुवे नीडे, स्वपत्युः(स्) सन्निधौ सती ॥ 57॥

तेषु काले व्यजायन्त, रचितावयवा हरेः ।

शक्तिभिर्दुर्विभाव्याभिः(ख्), कोमलां(ङ्)गतनूरुहाः ॥ 58॥

रचिता+ वयवा, शक्तिभिर् + दुर्विभा+ व्याभिः(ख्)

प्रजाः(फ्) पुपुषतुः(फ्) प्रीतौ, दम्पती पुत्रवत्सलौ ।

शृण्वन्तौ कूजितं(न्) तासां(न्), निर्वृतौ कलभाषितैः ॥ 59॥

तासां(म्) पतत्त्रैः(स्) सुस्पर्शैः(ख्), कूजितैर्मुग्धचेष्टितैः ।

प्रत्युद्गमैरदीनानां(म्), पितरौ मुदमापतुः ॥ 60॥

कूजितैर् + मुग्ध+ चेष्टितैः, प्रत्युद् + गमै+ रदीनानां(म्)

स्नेहानुबद्धहृदया- वन्योन्यं(वँ) विष्णुमायया ।

विमोहितौ दीनधियौ , शिशून् पुपुषतुः(फ्) प्रजाः ॥61॥

स्नेहा+ नुबद्ध+ हृदया

एकदा जग्मतुस्तासा-मन्नार्थं(न्) तौ कुटुम्बिनौ ।

परितः(ख्) कानने तस्मिन्- नर्थिनौ चेरतुश्चिरम् ॥ 62॥

जग्+ मतुस् + तासा, मन्+ नार्थं(न्), चेरतुश् + चिरम्

दृष्ट्वा ताँल्लुब्धकः(ख्) कश्चिद्, यदृच्छातो वनेचरः ।

जगृहे जालमातत्य, चरतः(स्) स्वालयान्तिके ॥63॥

ताँल्+ लुब्धकः(ख्), जाल+ मातत्य, स्वा+ लयान्+ तिके

कपोतश्च कपोती च, प्रजापोषे सदोत्सुकौ ।

गतौ पोषणमादाय, स्वनीडमुपजग्मतुः ॥ 64॥

सदोत् + सुकौ, पोषण+ मादाय, स्वनी+ डमुप+ जग्मतुः

कपोती स्वात्मजान् वीक्ष्य, बालकान् जालसं(वँ)वृतान् ।

तानभ्यधावत् क्रोशन्ती, क्रोशतो भृशदुःखिता ॥ 65॥

स्वात् + मजान्, जाल+ संवृतान्, तानभ्य+ धावत् + क्रोशन्ती, भृश+ दुःखिता

सासकृत्स्नेहगुणिता, दीनचित्ताजमायया ।

स्वयं(ञ्) चाबध्यत शिचा, बद्धान् पश्यन्त्यपस्मृतिः ॥ 66॥

सासकृत्+ स्नेह+ गुणिता, दीन+ चित्ता+ जमायया, पश्यन्त्य+ पस्मृतिः

कपोतश्चात्मजान् बद्धा- नात्मनोऽप्यधिकान् प्रियान् ।
भार्यां(ञ्) चात्मसमां(न्) दीनो, विललापातिदुःखितः ॥ 67॥

कपोतश् + चात्मजान् ,नात्मनोऽ + प्यधिकान्
चात्+ मसमां(न्), विलला+ पाति+ दुःखितः

अहो मे पश्यतापाय- मल्पपुण्यस्य दुर्मतेः ।
अतृप्तस्याकृतार्थस्य, गृहस्त्रैवर्गिको हतः ॥ 68॥

पश्य+ तापाय, मल्प+ पुण्यस्य, अतृप्तस् + याकृतार् + थस्य, गृहस् + त्रैवर् + गिको

अनुरूपानुकूला च, यस्य मे पतिदेवता ।
शून्ये गृहे मां(म्) सन्त्यज्य, पुत्रैः(स्) स्वर्याति साधुभिः ॥ 69॥

अनुरूपा+ नुकूला, सन् + त्यज्य

सोऽहं(म्) शून्ये गृहे दीनो, मृतदारो मृतप्रजः ।
जिजीविषे किमर्थं(वँ) वा, विधुरो दुःखजीवितः ॥ 70॥

तां(म्)स्तथैवावृताञ्छिग्भिर्- मृत्युग्रस्तान् विचेष्टतः ।
स्वयं(ञ्) च कृपणः(श्) शिक्षु, पश्यन्नप्यबुधोऽपतत् ॥ 71॥

तां(म्)स्+ तथैवा+ वृताञ् + छिग्भिर्, मृत्यु+ ग्रस्तान्
पश्यन् + नप् + यबुधोऽ+ पतत्

तं(लँ) लब्ध्वा लुब्धकः(ख्) क्रूरः(ख्), कपोतं(ङ्) गृहमेधिनम् ।
कपोतकान् कपोतीं(ञ्) च, सिद्धार्थः(फ्) प्रययौ गृहम् ॥ 72॥

गृह+ मेधिनम्, कपो+ तकान्

एवं(ङ्) कुटुम्ब्यशान्तात्मा, द्वन्द्वारामः(फ्) पतत्त्रिवत् ।
पुष्णन् कुटुम्बं(ङ्) कृपणः(स्), सानुबन्धोऽवसीदति ॥ 73॥

कुटुम्ब्य+ शान्तात्मा, पतत् + त्रिवत्, सानुबन्धोऽ+ वसीदति

यः(फ्) प्राप्य मानुषं(लँ) लोकं(म्), मुक्तिद्वारमपावृतम् ।
गृहेषु खगवत् सक्तस् - तमारूढच्युतं(वँ) विदुः ॥ 74॥

मुक्ति+ द्वार+ मपावृतम्, तमा+ रूढ+ च्युतं

इति श्रीमद्भागवते महापुराणे पारमहं(म्)स्यां(म्)
सं(म्)हितायां(म्) एकादशस्कन्धे सप्तमोऽध्यायः ॥

ॐ पूर्णमदः(फ्) पूर्णमिदं(म्)पूर्णात्पूर्णमुदच्यते
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥
ॐ शान्तिः(श्)शान्तिः(श्)शान्तिः ॥

